Chapter-3

# तृतीयं प्रकरणम्

## १.३.० वसिष्ठसंहितायाः सामान्यपरिचयः

### १.३.१ संहितापरिचयः-

अथ श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितां वसिष्ठसंहितायां विविधज्योतिषशास्त्रीयविषयोपरि षट्चत्वारिंशद्(४६)अध्यायाः सम्मिलिताः सन्ति। तथा च सर्वेष्वध्यायेषु श्लोका एव सन्ति, न गद्यम्। विविधछन्दोबद्धोऽयं ग्रन्थः। अस्मिन्संहिताग्रन्थे – सिद्धान्तविभागे सूर्यादीनां नवग्रहाणां चारविषये प्रतिपादितम्। पञ्चाङ्गप्रकरणे तिथि–वार–नक्षत्र–योग–करणादीनां व्यवहारे किं महत्त्वम् –इति स्पष्टीकृत्य विस्तृतं विवरणं निर्दिष्टमस्ति। मनुष्याणां जीवने गर्भाधानादारभ्यान्त्येष्टिपर्यन्तं विविधाः संस्कारा वर्तन्ते। अत्र षोडशसंस्काराणां महत्त्वं प्रदर्श्य विस्तृतरूपेण मुहूर्तविचारः प्रतिपादितः। वसिष्ठसंहितान्तर्गते वास्त्वध्याये गृहनिर्माणे ग्रामसप्तपुरादीनां सविस्तरं विवेचनं कृतं, यद्ग्रन्थस्यास्य वैशिष्ट्यमस्ति। तथा चान्ये महत्त्वपूर्णा विषया यथा यात्राध्यायः, वस्त्रपरिधानाध्यायः, गुणदोषनिरूपणाध्यायः, उत्पाताध्यायः, राजाभिषेकाध्यायस्तथा विविधशान्त्यादीनां विवेचनं शान्त्याध्याये कृतमस्ति।

अथ वसिष्ठसंहितायां प्रत्येकाध्याये वर्णिताविषयाः श्लोकसंख्या च निम्नलिखितरूपेणास्ति।

| अध्यायक्रमः | अध्यायनाम | श्लोकसंख्या |
|---|---|---|
| १ | शास्त्ररूपाध्यायः | ०१३ |

| | | |
|---|---|---|
| २ | अर्कचाराध्याय: | ०२५ |
| ३. | चन्द्रचाराध्याय: | ०२२ |
| ४. | भौमचाराध्याय: | ०१५ |
| ५. | बुधचाराध्याय: | ०१७ |
| ६. | गुरुचाराध्याय: | १०१ |
| ७. | शुक्रचाराध्याय: | ०१९ |
| ८. | शनिचाराध्याय: | ००६ |
| ९. | राहुचाराध्याय: | ०६२ |
| १०. | केतुचाराध्याय: | ०५० |
| ११. | वर्षेशादिनिर्णयफलाध्याय: | ०५० |
| १२. | तिथिस्वरूपाध्याय: | ०७५. |
| १३. | वारस्वरूपाध्याय: | ०२० |
| १४. | नक्षत्रस्वरूपाध्याय: | ११२ |
| १५. | योगाध्याय: | ०४१ |
| १६. | करणाध्याय: | ०१९ |
| १७. | मुहूर्ताध्याय: | ००९ |
| १८. | गोचरविचाराध्याय: | १७९ |
| १९. | संक्रान्त्यध्याय: | ०३१ |
| २० | चन्द्रताराबलाध्याय: | ०१२ |
| २१ | उपग्रहाध्याय: | ०१० |
| २२ | ग्रहकूटाध्याय: | ०१४ |

| | | |
|---|---|---|
| २३ | लग्नबलाध्याय: | ०४७ |
| २४ | आधानाध्याय: | ०४८ |
| २५ | पुंसवनसीमन्ताध्याय: | ०१७ |
| २६ | जातकर्मनामकर्माध्याय: | ००४ |
| २७. | अन्नप्राशनाध्याय: | ०१० |
| २८. | चौलाध्याय: | ०१२ |
| २९. | उपनयनाध्याय: | ०७९ |
| ३० | समावर्तनाध्याय: | ००३ |
| ३१. | विवाहप्रश्नाध्याय: | ००८ |
| ३२. | विवाहाध्याय: | २४४ |
| ३३. | राजाभिषेकाध्याय: | ०६० |
| ३४. | अश्वारिष्टशान्त्यध्याय: | ०२३ |
| ३५. | गजारिष्टशान्त्यध्याय: | ०४६ |
| ३६. | ग्रहणशान्त्यध्याय: | ०२४ |
| ३७. | यात्राध्याय: | २३३ |
| ३८. | गृहप्रवेशाध्याय: | ०२४ |
| ३९. | वास्त्वध्याय: | २२२ |
| ४०. | सुरप्रतिष्ठाध्याय: | ०२१ |
| ४१. | गुणनिरूपणाध्याय: | ०५२ |
| ४२. | दोषनिरूपणाध्याय: | १७४ |
| ४३. | गुणदोषापवादाध्याय: | १४६ |

| | | |
|---|---|---|
| ४४. | वस्त्रपरिधानाध्यायः | ०१३ |
| ४५. | उत्पाताध्यायः | १९३ |
| ४६. | रोगोत्पत्तिशान्त्यध्यायः | ११४ |
| | श्लोकसंख्या | २,७१९ |

वसिष्ठसंहिताग्रन्थे षड्चतुर्विंशत्यध्याये (४६) पूर्णतः २,७१९ श्लोकाः सम्मिलिताः।

### १.३.२ हस्तलिखितानां विस्तृतं वर्णनम् --

#### १) व१

१ संकेतः - **व१**

२ संस्था - प्राच्यविद्यामंदिरम्, म.स. विश्वविद्यालयः, वडोदरा

३ हस्तलिखितक्रमांकः - ९३२०, विषयः- ज्योतिषम्

४ शीर्षकम् - वसिष्ठसंहिता - अनुक्रमणिकासहिता

५ कर्ता - वृद्धवसिष्ठः

६ हस्तलिखितलेखनसमयः - खिस्ताब्दे १६५४

७ ग्रन्थसंख्या - ३,८००

८ पत्राणि - १तः १६३(८३ तथा १२७ अप्राप्यानि)-सर्वयोगः-पत्राणि

९ प्रतिपङ्क्तावक्षराणि - ३०

१० प्रतिपृष्ठे पङ्क्तय: - १२

११ हस्तलिखितस्य स्थिति:- समीचीना

१२ हस्तलिखितप्रारम्भ: - विघ्नौघाग्निवारणाय नम:। प्रह्वोभोजसुसुरेङ्निकरस्फुर्जित्किरीटोज्ज्वलज्योस्नालीढपदारविंदयुगुलस्तत्त्वस्वरूपो रवि:।। ब्रह्माण्डोदरसंस्थिताखिलजगच्चेतस्यविघ्नस्तया कुर्वन्निखिलजगदिनपर्णेति कालात्मक:।।१।।

१३ हस्तलिखितस्य अन्तभाग: पुष्पिका च- आचार्यं पूजयेत् विप्रान् दैवज्ञं च विशेषत:।। गोभूहिरण्यवस्त्रादीन् ब्राह्मणेभ्य: प्रयच्छति।। एवं शांतिकरं कर्म कुर्यादायु:प्रवृद्धये।। इति श्रीवृद्धवसिष्ठविरचितायां महासंहितायां कुरुयोगविधानाध्याय:।। श्रीकृष्णार्पणमस्तु।।

१४ लेखक: - नामनिर्देशो नास्ति।

१५ अन्तिमपुष्पिकोत्तरं लेख: - शके १५७६, जयसंवत्सरे उत्तरायणे शिशिरऋतौ माघमासे अष्टम्यां अर्कवारे रात्रौ समाप्त:।

१६ आकारमानम् - सें.मि.मध्ये दैर्घ्यम् ११, विस्तार: २३

१७ पत्रचतुर्भागेषु रिक्तस्थानस्य आकारमानम् - सें.मि.मध्ये वामभागे २, दक्षिणे २, उपरि-१.५, अधस्तात्-१.८

१८ वर्णानामुपयोग: - श्लोकसंख्या रक्तवर्णरञ्जिता।

१९ लोप: - ८३ तथा १२७ पत्राणामभावेन ग्रन्थलोप:

२० हस्तलिखिते क्षतिपूरणं प्रक्षेप: - क्षतिपूरणं १३ क्रमाङ्के पत्र उपरितनभागे तथा २७ क्रमाङ्के पत्रे निम्नप्रभागे। ४६ अध्यायानन्तरं कुरुयोगविधानाध्यायस्य प्रक्षेप:, अष्टश्लोका:।

२१ अन्ये विशेषा:- पृष्ठमात्रायास्तथा परसवर्णस्य प्रयोगो नास्ति। शषसां सुष्ठु भेद:।

लेखनं सुवाच्यम्। पत्रक्रमाङ्कः पत्रपृष्ठभागे लिखितः।

२) वर

१ संकेतः – **वर२**

२ संस्था – प्राच्यविद्यामंदिरम्, म.स. विश्वविद्यालयः, वडोदरा

३ हस्तलिखितक्रमांकः – ११२२, विषयः– ज्योतिषम्

४ शीर्षकम् – वृद्धवसिष्ठसंहिता

५ कर्ता – वृद्धवसिष्ठः

६ हस्तलिखितलेखनसमयः – ख्रिस्ताब्दे १८९१

७ ग्रन्थसंख्या – ३,१००

८ पत्राणि – ११८(९१ विशालानि तथा २७ अन्य-आकारमानम्)

९ प्रतिपङ्क्तावक्षराणि – ३०

१० प्रतिपृष्ठे पङ्क्तयः – १४

११ हस्तलिखितस्य स्थितिः – समीचीना

१२ हस्तलिखितप्रारम्भः – श्रीगणेशाय नमः। ज्योतिःशास्त्रसंसारप्रथमपुरुषतः स्वर्णगर्भादित्वा पूर्ववलातथोपयरिलमुनिगणप्रार्थनाद्यचकार।। तच्चेदं सुप्रसन्नं मृदुपदनिकरैर्गुह्यमध्यात्मरूपविश्वप्रकाशग्रहचरितविदां निर्मलं ज्ञानचक्षुः।।२।।

१३ हस्तलिखितस्य अन्तभागः पुष्पिका च– गोभूहिरण्यवस्त्रादिब्राह्मणेभ्यः प्रयच्छति। एवं शांतिकरकर्म कुर्याद्वायुःप्रवृद्धये। इति वृद्धवसिष्ठब्रह्मर्षिविरचितायां महासंहितायां वज्रयोगविधानाध्यायः पंचाष्टाष्टचत्वारिंशतमः संपूर्णः।

१४ लेखकः – नामनिर्देशो नास्ति।

१५ अन्तिमपुष्पिकोत्तरं लेखः - सं. १९४७ रा. आषाढसुद ८ बुधवारे।

१६ आकारमानम् - सें.मि.मध्ये दैर्घ्यम् १७, विस्तारः २६

१७ पत्रचतुर्भागेषु रिक्तस्थानस्य आकारमानम्-सें.मि.मध्ये वामभागे २.५, दक्षिणे २, उपरि-१.५, अधस्तात्-२

१८ वर्णानामुपयोगः - श्लोकसंख्या रक्तवर्णरञ्जिता।

१९ लोपः - ग्रन्थलोपो नास्ति।

२० हस्तलिखिते क्षतिपूरणं प्रक्षेपः - क्षतिपूरणं ४ क्रमाङ्के तथा १४ क्रमाङ्के पत्र उपरितनभागे तथा २६ क्रमाङ्के पत्रे दक्षिणप्रभागे। ग्रन्थसमाप्तिपूर्वमन्ते वज्रयोगविधानाध्यायः ग्रन्थसमाप्ति-अनन्तरं चैत्रादिमासेषु शुक्रोदयफलम्, अश्विन्यादिनक्षत्रेषु शुक्रदाराणि स्वरोदयफलम्, आदित्यशान्तिः -एते प्रक्षेपाः।

२१ अन्ये विशेषाः - पृष्ठमात्रायास्तथा परसवर्णस्य प्रयोगो नास्ति। लेखनं सुवाच्यम्। पत्रक्रमाङ्को न लिखितः। लेखकभेदेन लेखनाक्षरभेदः।

## ३) व३

१ संकेतः - **व३(अपूर्णम्)**

२ संस्था - प्राच्यविद्यामंदिरम्, म.स. विश्वविद्यालयः, वडोदरा

३ हस्तलिखितक्रमांकः - ११३६६, विषयः- ज्योतिषम्

४ शीर्षकम् - महासंहिता

५ कर्ता - ब्रह्मर्षिवृद्धवसिष्ठः

६ हस्तलिखितलेखनसमयः - न निर्दिष्टः।

७ ग्रन्थसंख्या - १,१००

८ पत्राणि – २–६०(५९ पत्राणि)

९ प्रतिपङ्क्तावक्षराणि – ३०

१० प्रतिपृष्ठे पङ्क्तयः – १०

११ हस्तलिखितस्य स्थितिः – जीर्णशीर्णा।सप्तमश्लोकतः प्रारम्भः।

१२ हस्तलिखितप्रारम्भः – अध्येतव्यं ब्राह्मणेरैव तस्माज्ज्योतिःशास्त्रं पुण्यमेतद्रहस्यम्। एतद्बुद्धिसम्यगाप्नोति यस्मादर्थधर्ममोक्षमग्रयशश्च।।७।।

१३ हस्तलिखितस्य अन्तभागः पुष्पिका च – अध्याय १८, श्लोक १५५ धिनुशंखरक्तवृषहेमपीतांबरद्वय।। श्वेताश्वकृष्णवर्णगाकृष्णलोहमजक्रमात्।।५५।।

१४ लेखकः – नामनिर्देशो नास्ति।

१५ अन्तिमपुष्पिकोत्तरं लेखः – न विद्यते।

१६ आकारमानम् – सें.मि.मध्ये दैर्घ्यम् १५, विस्तारः ३१

१७ पत्रचतुर्भागेषु रिक्तस्थानस्य आकारमानम् – सें.मि.मध्ये वामभागे ३, दक्षिणे ३, उपरि–२.५, अधस्तात्–२.५

१८ वर्णानामुपयोगः – प्रत्येकाध्यायपुष्पिका रक्तवर्णरञ्जिता।

१९ लोपः – प्रथमाध्यास्य षट्श्लोकाः, अष्टादशाध्यायस्य १५६श्लोकतोऽन्तपर्यन्तं ग्रन्थलोपः।

२० हस्तलिखिते क्षतिपूरणं प्रक्षेपः– क्षतिपूरणं १६ क्रमाङ्के पत्र उपरितनभागे तिस्रः पङ्क्तयः तथा अधस्तनभागे पङ्क्तिद्वयम्। प्रक्षेपा न सन्ति।

२१ अन्ये विशेषाः – पृष्ठमात्रायास्तथा परसवर्णस्य प्रयोगो नास्ति। लेखनं सुवाच्यम्। पत्रक्रमाङ्कः पत्रस्य पृष्ठभागे लिखितः। शषसां सुष्ठु भेदः।

### १.३.३ प्रकाशितपुस्तकानामाधारः --

१) वशिष्ठसंहिता

लेखक :- ब्रह्मर्षिवृद्धवशिष्ठः (अध्याय : १ तः ४६, २,७१९ श्लोकाः)

संपादकः- गङ्गाविष्णुः श्रीकृष्णदासः

प्रकाशकः- पं. शिवदुगुलारे वाजपेयी

मुद्रकः - श्रीलक्ष्मीवेंकटेश्वरमुद्रणालयः, कल्याण-मुंबई

संस्करणम् -सं. १९७२, शके १८३७, ख्रिस्ताब्दम्-१९१६

२) वशिष्ठसंहिता

लेखकः - ब्रह्मषिवृद्धवशिष्ठः (अध्यायः १ तः ४६, २,७१९ श्लोकाः)

संपादकः/टीकाकारः- डॉ. गिरिजाशङ्करशास्त्री

प्रकाशकः - चौखम्बा -संस्कृत-भवनम्, वाराणसी

मुद्रकः - श्रीगोकुलेशमुद्रणालयः, वाराणसी

संस्करणम् - प्रथमं वि.सं. २०६५, ख्रिस्ताब्दम्-२००९

(मम संशोधनकार्यप्रारम्भः २००७ मध्ये )

### १.३.४ अन्यग्रन्थेषु वसिष्ठस्योद्धरणानि-

तृतीयविभागे चतुर्थं परिशिष्टं द्रष्टव्यम्।

१ बृहत्संहिता- भट्टोत्पलव्याख्यासहिता।

२ बृहत्संहिता- पं. अच्युतानन्द झाव्याख्यासहिता।

३ मुहूर्तचिन्तामणिः- रामदैवज्ञः, पीयूषधारा व्याख्या च।

४ वास्तुरत्नाकर: - श्रीविन्ध्येश्वरीप्रसादरचित:,व्याख्यासहित:।

५ वास्तुरत्नावली - श्रीजीवनाथदैवज्ञरचिता।

६ वास्तुसौख्यम् - श्रीटोडरमल्लरचितम्।

## १.३.५ पाठनिर्धारणनियमा:-

१ प्रत्येकस्य ग्रन्थस्य विशेषा: सन्ति। संपादनं पाठनिर्धारणं च तदनुसारं कर्तव्यम्।

२ वृद्धवसिष्ठसंहिताया: संपादनं मुख्यत: वटोदर-प्राच्यविद्यामन्दिरत: संप्राप्तानां हस्तलिखितत्रयाणामाधारेण क्रियते। हस्तलिखितग्रन्था: प्रायेण दोषपूर्णा: सन्ति। श्रीवेंकटेश्वर मुद्रणालयद्वारा प्रकाशितावृत्त्यां तथा आधुनिकतमचौखम्बाप्रकाशितावृत्त्यामपि बहवो संपादनदोषा: व्याकरण-छन्द-पदच्छेद-मुद्रणरूपा: दरीदृश्यन्ते। संपादनशास्त्रविज्ञानदृष्ट्या हस्तलिखितानामाधारसामग्र्या वर्णनं नास्ति।

३. छन्द-व्याकरण-पदच्छेद-लेखन-श्लोकार्थाज्ञानजनितदोषाणां यथाशक्यं परिमार्जनं कृत्वा शुद्धस्य प्राचीनतमस्य च पाठस्य पुनर्निधारणं हस्तलिखितग्रन्थानामन्यग्रन्थोक्तोद्धरणानामाधारेण विधीयते।

४. हस्तलिखितेषु संप्राप्तस्य सर्वसाधारणपाठस्य स्वीकार: प्रायेण कृत:।

५. मूलग्रन्थे क्वचिद् व्याकरणस्य छन्दसश्च शैथिल्यं वर्तते। किन्तु तस्य परिशुद्धि: स्वमतेन न कृता।

६. पाठनिर्धारणस्य कृते समुपयुक्तहस्तलिखितानां वंशवृक्ष: परस्परसम्बन्धश्च निम्नरूपेण कोष्टकद्वारा निर्दिश्यते।

मूलपाठः

|

|

---

| | |
|---|---|---|
| वर१ | वर२ | वर३ |

१.३.६ प्रत्येकाध्यायस्य विषयविवेचनसारः-

**अध्यायः १** – प्रथमाध्याये, शास्त्रस्वरूपनामके प्रथमं ब्रह्माण्डरूपस्योदरे स्थितस्य सूर्यस्य वन्दनं, पश्चात् ज्योतिषशास्त्रस्योत्पत्तिर्महत्त्वं प्रदर्शितम्। दैवज्ञलक्षणं स्पष्टीकृतम्। संहिताग्रन्थे वर्णितानां विविधविषयानां नामानि कथितानि। यथा – आधान-पुंसवनादिषोडशसंस्काराः, उत्पाताः, शान्तिः, पञ्चाङ्गम्, ग्रहचारादिः- इत्यादयो विषयाः सम्मिलिताः।

**अध्यायः २** – द्वितीयेऽर्कचाराध्यायेऽधिक-क्षयमासनिर्णयः, क्रान्तिवृत्तस्य द्वादशभागविभाजिता मेषादिराशयः, चैत्रादिद्वादशमासाः, मकरसंक्रान्तिपरत्वेन शिशिरादिषड्ऋतुनिर्णयः, अश्विन्यादिसप्तविंशतिनक्षत्रस्थितस्य सूर्यस्य शुभाशुभफलम्, ग्रीष्मादि-ऋतुकाले सूर्यमण्डलवर्णाधारेण शुभाशुभफलम्, विप्रादिचतुर्वर्णपरत्वेन रविमण्डलस्य तथा च सूर्यमण्डलवर्णाधारेण शुभाशुभं वर्णितमस्ति।

**अध्यायः ३ -** तृतीये चन्द्रचारानामकेऽध्याये ग्रहचारेष्वमृतकिरणैर्युक्तचन्द्रचारस्य शुभाशुभफलं कथितम्। सूर्यचन्द्रयोः कारणेन तिथयः सम्भूताः। निर्मलप्रतिपद्यन्ते चन्द्रस्याभ्युदितशृङ्गे मेषादिराशयः स्थितस्तथा च शृङ्गाकाराधारेण शुभाशुभफलं कथितः। चन्द्रस्य शृङ्गं यदि भौमादिग्रहैर्वेधितं,तदा किं फलं प्राप्नोति तथा च चन्द्रमा यन्नक्षत्रे स्थितः,तदा किं फलं प्राप्नोति तद्विषये सविस्तरं वर्णितम्। महर्घ-समर्घविचारः, वृष्टिविचारोऽप्यस्मिन्नध्याये वर्णितः। कुन्दः, कुमुदः, निर्मलः, वज्रकान्तिसमश्चन्द्रमाः यस्मिन्मासेऽभ्युदितः, तदा तस्मिन् प्रजानां क्षेमं सुभिक्षं च करोति।

**अध्यायः ४ -** चतुर्थाध्याये, भौमचारनामके भौमचारं विना जगतः शुभाशुभज्ञानं न ज्ञायते इत्युक्तम्। अथाध्याये वक्रीसंज्ञकस्य, अश्रुमुखसंज्ञकस्य, व्यालमुखसंज्ञकस्य, रक्ताननसंज्ञकस्य तथा च मुशलसंज्ञकस्य भौमस्य फलं कथितम्। नक्षत्राणां याम्ये, सौम्ये वा विचरतो भौमस्य फलं वर्णितम्। तथा च भौमोदयस्य शुभफलं कथितम्।

**अध्यायः ५ -** पञ्चमाध्याये, बुधचाराख्ये नक्षत्रेषु विचरतो बुधस्य शुभाशुभफलं कथितम्। प्राकृता-मिश्रा-संक्षिप्रा -तीक्ष्णा-योगान्तिका-घोरा-पापा एता बुधस्य सप्तविधा गतिभेदा विविधफलदाः स्मृताः।

**अध्यायः ६ -** षष्ठाध्याये, गुरुचारनामके कृत्तिकादिनक्षत्रारम्भात् सप्तविंशतिनक्षत्राणि द्वादशमासेषु सम्मिलितानीति कथितम्। गुरोदितनक्षत्राधारेण वर्षस्य नाम भवेत्। कार्त्तिकादिमासेषु गुरोर्वर्षारम्भफलम्, गुरोर्वर्णानुसारेण फलं, प्रभवादिसंवत्सरानयनपद्धतिः, संवत्सरनामानि, फलानि च विस्तरेण विवेचितानि। मेषादिराशौ स्थितस्य गुरोः फलं, तथा च गुरोरुदिते शुभफलमित्यादयो विषया वर्णिताः।

**अध्यायः ७ -** सप्तमाध्याये, शुक्रचारनामके उत्तरतः, मध्यत एवं दक्षिणत-एतन्मार्गत्रयात् नाग-गज-ऐरावत-वृष-गो-जरद्गो-मृग-अज-दहननामसु- एतासु नववीथिषु

शुक्रस्य गमनं स्यात्। तत्र एकस्यां वीथ्यां नक्षत्रत्रितयं क्रमेण स्यात्। शुक्रस्योदयास्ताधारेण वृष्टिविचार: कथित:। वक्री चन्द्रम:समान:, कुन्द–कुमुदपुष्पस्फटिकप्रवालवैदूर्यशङ्खसमान:, दधिमुक्ताफलसम: विशालकान्तिमान् शुक्रो जनानां शुभद: स्यात्।

**अध्याय: ८** - अष्टमाध्याये, शनिचारनामके, अश्विन्यादिषु नक्षत्रेषु विचरतस्तथा च मेषादिराशौ स्थितस्य शनिन: शुभाशुभफलमतिसंक्षिप्तेन केवलं षट् श्लोकेषु कथितम्।

**अध्याय: ९** - अथ नवमाध्याये राहुचारनामक उक्तम् – अमृतप्राशनेन राहुरमरत्वमिच्छतीति ज्ञात्वा विष्णुस्तस्य शीर्षं चक्रेण चिच्छेद। किन्तु "अमृतमयत्वान्नत्वा हरिं शिर उवाच विस्मिते सदसि। दातव्या ग्रहसमता गतोऽस्मि मां रक्ष तव शरणम् "।।२।। अस्मिन् श्लोके राहोर्ग्रहाणां मध्ये ग्रहत्वं (अष्टमस्थानं) प्रदत्तमिति पौराणिककथा राहुचाराध्यायारम्भे कथिता। सूर्यचन्द्रयोर्ग्रहणकाले राहु: सूर्यचन्द्रौ ग्रसति। राहो: कारणेन, सूर्यचन्द्रयो: ग्रहणसम्भवासम्भवं गाणितिकदृष्ट्या ज्ञातुं शक्यते। ब्राह्म–चान्द्र–ऐन्द्र–कौबेर–वारुण–अग्नि–याम्यपर्वेषु ग्रहणं भवति। तस्य शुभाशुभविचारो वर्णित:। सूर्यचन्द्रयोर्दश ग्रासा दक्षिणहनु–वामहनु–दक्षिणकुक्षि–वामकुक्षि–दक्षिणपायु–वामपायु–संछर्दन–जरण–मध्य–विदारण– अन्त्य–नाम्ना कथ्यन्ते। ग्रहणसमये राहोर्वर्णाधारेण शुभाशुभविचार: कथित:। तथा कार्त्तिकादिषु द्वादशमासेषु ग्रहणे शुभाशुभविचार: कथित:।

**अध्याय: १०** - अथ दशमाध्याये, केतुनामक उक्तम् – केतोरुदयास्तौ गणितात् ज्ञातुं न शक्येते। दिव्यान्तरिक्षभौमोत्पन्नास्त्रिविधा: केतवो जगति स्यु:। तस्य केतोरेकोत्तरशतं सहस्रभेदा वा दृश्यन्ते। आकाशे नक्षत्रग्रहणोत्पन्नो दिव्यकेतुर्महाफलद: स्मृत:। परिवेषेन्द्रधनुरुल्का– गन्धर्वनगराणि, निर्घात:, अन्तरिक्षविकारोत्पन्न: केतुरन्तरिक्षनाम्ना ख्याता मध्यमफलद: स्मृत:। भूम्योत्पन्न: केतुर्भौमकेतुनाम्ना

चरस्थिरवस्तुसम्भवोऽधमफलदः स्मृतः। केतोर्वर्णास्तथा पूर्वादिदिक्षु केतोरुदयास्ताधारेण केतोर्वर्णफलं कथितम्। यथा उक्तम् –

अपरेन्द्रदिशो दृश्या महाहवं तद्दिगीशानाम्।

शुकमुखबन्धूकनिभा वह्निसुताः क्षतजसन्निभा रूक्षाः ।।८।।

अर्थात्पश्चिमदिशि दृष्टव्या महाभीतिकारकाः, तद्दिग्स्वामिनः शुकमुखबन्धूकनिभा अग्निपुत्राः क्षतजवर्णाः केतवो रूक्षाः स्युः। एवमग्निकोणे केतोदयो भयकारकः प्रजा नाशयति। दक्षिणदिशायां केतोदयो जनानां मृत्युभयप्रदः स्यात्। उत्तरदिशायां जनानां सुभिक्षकारकः स्यात्। एतत्प्रकारेण विविधनामनो केतवो विविधफलदाः स्मृताः। एवमश्विन्यादिसप्तविंशति-नक्षत्रोत्पन्नाः केतवो विविधफलदाः स्मृताः। यथाश्विनीनक्षत्रोत्पन्नः केतुरश्वजीविनो हन्ति। भरणीनक्षत्रोदितो म्लेच्छाधिपतिं हन्ति। एवमन्येषु नक्षत्रेषूदितो विविधफलप्रदः स्यात्।

**अध्यायः ११** – एकादशाध्याये वर्षेशादिनिर्णयफलविषयेऽध्यायारम्भे प्रथमश्लोके ज्योतिषे सिद्धान्तग्रन्थेषूक्तनवविधकालमानविषये (ब्राह्म-दिव्य-मनु-पितृ-सौर-चान्द्र-गुरु-सावन-नाक्षत्रविषये) विस्तृतरूपेण कथितम्। अथाध्याये वर्षस्य राजाधिपनिर्णयः, मन्त्रीनिर्णयः, सस्याधिपतिनिर्णयस्तथा च रसाधिपतिनिर्णयः, फलानि च विस्तारपूर्वकं कथितानि। चैत्रमासस्य शुक्लप्रतिपद्दिने यो वारः स्यात्, तद्वासराधिपोऽब्दपतिर्नृपः स्यात्। एवं मेषसंक्रमणदिने मन्त्री, कर्कसंक्रमणदिने सस्याधिपतिस्तथा च तुलासंक्रमणदिने रसेशः स्यात्। अथ राजा-मन्त्री-सस्याधिपतिरेवं रसाधिपतिपरत्वेन सूर्यादिग्रहाणां विस्तृतरूपेण विविधफलान्युक्तानि। यथा सूर्यो यदि राजा तदा मध्यमवृष्टिदः स्यात्। पृथिव्यामनेकयोद्धा नित्यं चरन्ति। यदि सूर्यो मन्त्री, तदा निरन्तरं सर्वसस्यानि विचित्रवर्णान्युत्पन्नानि भवन्ति। यदि सूर्यः सस्याधिपतिस्तदा सर्वसस्यानि भूमौ विरलानि भवन्ति। यदि सूर्यो रसेशस्तदा चन्दन- कुङ्कुम-गुग्गुल-तिल-तैल-

एरण्डतैलमुख्यानि प्रचुराणि भवन्ति। एवमन्येषां ग्रहाणां फलानि कथितानि। अनन्तरं क्षेपाविषय उक्तम्।

**अध्यायः १२** – अथ द्वादशाध्याये, तिथिस्वरूपविषये प्रत्येकतिथिस्वामिनः परत्वेन पुराणदृष्ट्या भेदाः प्रदर्शिताः। यथा –

दिनाधिपा धातृविधातृविष्णुयमेन्दुषड्वक्त्रशचीश्वराश्च।

वस्वाख्यनागौ परतश्च धर्मशिवार्ककामाः कलिविश्वसंज्ञौ।।१।।

तथा पुराणदृष्ट्या —

वह्निर्विधाताऽद्रिसुता गणेशः सर्पः कुमारो दिनपो महेशः।

दुर्गा यमो विश्वहरी च कामः शिवो निशीशश्च पुराणदृष्टः।।३।।

नन्दादितिथीनां संज्ञा उक्ता। प्रतिपदादितिथिपरत्वेन कानि शुभाशुभकार्याणि कर्तव्यानीति निर्णीतम्। यथा यज्ञादिक्रियाः, पौष्टिकमङ्गलानि, संग्रामयोग्याखिलवास्तुकर्म, भूषणादिकार्यं,प्रतिष्ठादिकार्याणि पौर्णिमास्यां कर्तव्यानि। इति सप्तदशश्लोक उक्तम्। विविधतिथीनां विशेषफलमुक्तं वैशिष्ट्यं च प्रदर्शितम्। यथा मासदग्धासु तिथिषु कृतं सर्वं मङ्गलादिकं कार्यं नाशमायाति, यथा ग्रीष्मे कुसरित इति षड्विंशतिश्लोक उक्तम्। विशेषतिथीनां विशिष्टं महत्त्वं प्रदर्शितम्। यथा माघमासस्य कृष्णचतुर्दश्यामुपोषित्वा यो मनुजो भक्तिपूर्वकं जागरं कुर्यात्, शिवं व्रजेत्, तस्य पुनर्भवो नास्ति। एवमनेकानि वैशिष्ट्यानि प्रदर्शितानि।

**अध्यायः १३** – अथ वाराध्याये रविवासरादिषु सप्तवारेषु कानि शुभाशुभकार्याणि कर्तव्यानि एतद्विषये वर्णितम्। उक्तं यथा —

राजाभिषेकोत्सवमङ्गलाश्च सेवाहवस्त्वौषधचित्रकर्म।

धातुक्रियाभूषणलाक्षचर्मधान्योर्णकोष्ट्रादि रवौ विदध्यात् ।।१।।

अनन्तरं सूर्यादिसप्तवारेष्वभ्यङ्गतैलादिलेपने शुभाशुभफलं कथितम्। कालहोराविषये संक्षिप्तेनोक्तम् । तथा च रव्यादिवासरेषु नवाम्बरधृतिफलं कथितम्।

**अध्यायः १४** – अथाध्याये, चतुर्दशे, नक्षत्रस्वरूपविषयेऽश्विन्यादिसप्तविंशति-नक्षत्राणां स्वामिनः कथिताः। तेषां परत्वे किं शुभाशुभकार्यं करणीयमेतद् विषय उक्तम्। यथा –

यात्राभेषजभूषणविद्याश्वेभाजशिल्पवस्त्राद्यम्।
उत्सवमङ्गलकार्यं कर्तव्यं दस्रनक्षत्रे ।।२।।

अर्थात् – अश्विनीनक्षत्रे यात्रा–भेषज–आभूषण–विद्या–अश्वगजादियानं, अजं, शिल्पकर्म, वस्त्रादि–उत्सवादिमाङ्गलिककार्याणि कर्तव्यानि। अनन्तरं अश्विन्यादिनक्षत्राणां ध्रुव–चरस्थिरादिसंज्ञापरत्वे कानि कार्याणि कर्तव्यानि, यात्रादिप्रयाणेऽश्विन्यादिनक्षत्रपरत्वेन शुभाशुभज्ञानं, हलप्रवहणे, सङ्गीतनृत्यादि–आरम्भे किं नक्षत्रं शुभं तत्कथितम्। क्षौरकर्मादिकार्यपरत्वेन शुभनक्षत्राणि, द्विपुष्कर–त्रिपुष्करयोगफलानि च कथितानि। अश्विन्यादिनक्षत्राणामधोमुखादिसंज्ञाः, कुलाकुलसंज्ञाः, नक्षत्राणां तारकाणां सङ्ख्या, स्वरूपम्–इत्यादयो विषया वर्णिताः।

**अध्यायः १५** – अथ पञ्चदशाध्याये योगसंज्ञके, विष्कुम्भादिसप्तविंशतियोगानां नामानि कथितानि। एते स्वनामफलसदृशं फलं प्रददति। विष्कुम्भयोगस्य प्रथमनाडी, वज्र–गण्ड–अतिगण्डयोगारम्भतः षट् षट् च नाड्यः, व्याघातयोगारम्भे ५ घटयः, शूलयोगारम्भात् ५ घटयो मङ्गलकार्येषु विवर्जिताः। खार्जूरचक्रे, एकार्गलदोषस्तथा सम्पातियोगस्य शुभाशुभफलविषये कथितम्। विष्कुम्भादिसप्तविंशतियोगानां परत्वेन किं शुभाशुभं कार्यं कर्तव्यम्, एतद्विषये प्रतिपादितम्। यथा –

चौलं च बीजरोपं च स्त्रीसङ्गं दन्तकल्पनम्।

काष्ठकर्म रिपूच्चाटं विष्कुम्भे तु प्रकारयेत्।।९।।

**अध्यायः १६** - अथ षोडशाध्याये, करणासंज्ञे चर-स्थिरकरणानां नामानि तेषां स्वामिनः कथिताः, चर-स्थिरादिकरणे किं कार्यं कर्तव्यमेतद्विषये कथितम्। यथा –

चरस्थिरद्विजहितः पशुधान्यकरादि यत्।

धातुवादवणिग्धान्यकर्म सर्वं बवे हितम्।।५।।

अर्थात् चरकरणे बवनामके ब्राह्मणानां हितार्थे कृतं चरस्थिरादिकार्यं, पशुधान्यकरादिकं, धातुवादवणिग्धान्यकर्मादिकं समस्तकार्यं कर्तव्यम्। जीवितार्थी मनुजो मङ्गलकार्यं न कदाचित् कुर्यात्, कुर्वन्नाशस्तदा । तत्सर्वं क्षिप्रं नाशं व्रजेत्। इति उक्त्वा भद्राविषये विस्तृतरूपेण कथितम्।

**अध्यायः १७** - अथ सप्तदशाध्याये, मुहूर्तविषये दिवसे यामस्य पञ्चदशांशो क्षणमानो मुहूर्तः कथ्यते- इत्युक्त्वा तेषां स्वामिनः कथिताः। यत्कर्म यन्नक्षत्रे कथितम्, तत्कर्म तत्क्षणे कार्यम्। अनन्तरं रव्यादिवासरेषु त्याज्यमुहूर्तविषये कथितम्। यथा रविवासरे अर्यमा, सोमवासरे राक्षस एवं ब्रह्मा, भौमवासरे पितरः, एवमग्निः, बुधवासरेऽभिजित्, गुरुवासरे दैत्य एवं जलं, शुक्रवासरे पितर एवं ब्रह्मा, शनिवासरे सर्प एवं शिवो वर्जनीयः - इति नवमश्लोक उक्तम् ।

**अध्यायः १८** - अष्टादशाध्याये गोचरविचार आकाशे भ्रमतां ग्रहाणां वेधसहितं गोचरबलविषये कथितम्। तेषां शुभाशुभबलं नृपस्य जन्मनक्षत्रेण विचारणीयम्। स्वराशितः सूर्यादिग्रहा गोचरवशात् शुभाशुभफलं प्रददति। उक्तं यथा —

आसुतनिधनाङ्कान्त्यभवगृहगतः शुक्रः शुभदो न हतः।

वसुमदनाद्यखधर्मसुतारिसहजायगैर्न विद्धस्तैः।।७।।

अर्थात् - शुक्रः स्वराशितः प्रथम-द्वितीय-तृतीय-चतुर्थ-पञ्चम-अष्टम-नवम-एकादश-

SMT. HANSA MEHTA LIBRARY
M. S. University of Baroda

द्वादशस्थानेषु वा स्थितः शुभफलदः स्मृतः। यद्यष्टम-सप्तम-प्रथम-दशम-[illegible]-पञ्चम-षष्ठ-तृतीयस्थानेष्वन्यग्रहेण नो विद्धश्चेत्। यदि ग्रहा नीचगताः, रिपुविजिताः, रव्यभिभूताः, स्वशत्रुगेहस्थास्तदा कार्यक्षमा न भवन्ति, यथा भुजगा मन्त्रहताः। तथा एकोनविंशति(१९) श्लोक उक्तं यथा --

खचरेषु यदा विषमेष्वखिलनृणां व्याधिरर्थहानिः स्यात्।

सम्यग्विचार्य मनसा ग्रहशान्तिं कारयेन्नृपतिः।।१९।।

अर्थात् - ग्रहाणां विषमेषु स्थानेषु स्थितत्वेन समस्तनृणां धनहानिरेवं रोगेण पीडा भवति, इति सम्यग्विचार्यमनसा नृपतिर्ग्रहशान्तिं कारयेत्। अथाध्याये सूर्यादिग्रहाणां शान्त्यर्थे शान्तिकर्म विस्तृतरूपेण वर्णितम्। तत्र दानविधिः, मन्त्राः, शङ्ख- वृषभ-स्वर्ण-पीतवस्त्र-अश्व-कृष्णधेनु-आयस-रत्न-भूमि-छाग-शय्या-वस्त्र-आज्यपात्र-इत्यादीनां दानानि वर्णितानि।

**अध्यायः १९** - अथ एकोनविंशत्यध्याये संक्रान्तिविषयः कथितः। प्रत्येकमासे सूर्यस्य राशिसंक्रमणं भवेत्। एकस्मिन्मासे सूर्य एकस्या राशेर्भोगं करोति। अथ यन्मासे सूर्यस्य राशिसंक्रमणं यन्नक्षत्रयोगकरणपरत्वेन स्यात्, तदाधारेण शुभाशुभफलं प्राप्तं भवति। वारपरत्वेनापि शुभाशुभफलं ज्ञेयम्। सूर्यसंक्रमणात् प्राक्-परतः षोडश-षोडशनाड्यः पुण्यकालः स्मृतः। यः सर्वत्र स्नानदानयोः पुण्यप्रदः स्यात्। यन्नक्षत्रे संक्रान्तिर्भवेत्, तदाधारेण घोरादिनाम्ना संक्रान्तिर्भवेत्। तथा च सूर्यस्य संक्रमणकाले या राशिः स्यात् तदाधारेण विषुवपदी -आदीनि संक्रान्तिनामानि भवन्ति। विषुव-अयनसंक्रान्त्योः पुण्यकाले यो मनुजः श्राद्धादिकर्म करोति, तस्य पितरः सन्तुष्टा भवन्ति, अन्यथा तस्य पितरौ शापं प्रदाय व्रजन्ति- इत्युक्त्वा श्राद्धादिकर्ममहत्त्वं प्रतिपादितम्।

**अध्यायः २०** - अथ विंशत्यध्याये चन्द्रताराबलविषये चन्द्रबलविषय उक्तम्। यथाखिलमृगाणां सिंहो बलवान्, तथैव समस्तग्रहाणां मध्ये चन्द्रमा बलवान् स्यात्।

बलिनश्चन्द्रमसः कारणात् सर्वे ग्रहा नित्यं बलिनो भवन्ति। शुक्लपक्षे चन्द्रबलस्य तथा कृष्णपक्षे ताराबलस्य प्रधानता कथिता। ताराबलं नवधा ज्ञेयम्। तत्र प्रत्यरितारा प्रतिकूला तथा च नैधनतारा मृत्युप्रदा स्यात्।

**अध्यायः २१** - अथैकविंशत्यध्याय उपग्रहनामके सूर्यनक्षत्रतोऽष्टादशनक्षत्रं केतुसंज्ञक उपग्रहदोषः, पञ्चदशं दण्डसंज्ञकः, एकोनविंशमुल्कासंज्ञकः, तथा चतुर्दशं पातसंज्ञक उपग्रहः स्यात्। उपग्रहसंज्ञकनक्षत्रेषु युतश्चन्द्रमा नृणां मृत्युदः स्यात्। अतो विवाहादिमङ्गलकार्येषु विचारणीयम्। कालदण्डादियोगाः, आनन्दादियोगास्तिथिनक्षत्रयोर्योगेन भवन्ति।

**अध्यायः २२** - अथ द्वाविंशत्यध्याये ग्रहकूटनामके, नक्षत्रानयनपद्धतिद्वारा नक्षत्रज्ञानं कृत्वा समुदायसंज्ञक-जातिसंज्ञक-मानससंज्ञक-कर्मसंज्ञक-संघातसंज्ञकादिनक्षत्राणां शुभाशुभफलं कथितम्। उक्तं यथा -

ग्रहयज्ञैरभिषेकैर्होमेदानैः प्रयाति शमनं वै।
जन्मनि धिष्ण्ये यस्य ग्रहणोत्पाता भवन्ति तस्यैवम्।।१४।।

ग्रहाणां शान्त्यर्थे यज्ञहोमाभिषेकदानं कुर्यात्, शमनं प्रयाति। यस्य जन्मनक्षत्रे ग्रहणोत्पातास्तस्यैव शमनं प्रयाति।

**अध्यायः २३** - अथ त्रयोविंशत्यध्याये लग्नबलविषयके मेषादिद्वादशराशौ लग्ने स्थिते कानि कार्याणि कर्तव्यानि, तद्विषय उक्तं यथा -

अभिषेको नृपतीनां साहसकर्मादि वैरोधम्।
आकरधातुवाद्याखिलं मेषोदये कार्यम् ।।१।।

मेषलग्न अभिषेकः, नृपतीनां साहसकर्मादिवैरोधं, समस्तधातुवाद्यादिकार्याणि कर्तव्यानि।

किन्तु यदि लग्ने पापग्रहैर्युते दृष्टे वा तदा उक्तफलं न शक्यते कदाचन। अनन्तरं सूर्यादिग्रहाणां विशेषफलं द्वादशभावेषु संस्थित उक्तं यथा –

धर्मात्मजनैधनभे चरवर्गे त्वर्थसंग्रह: कार्य:।

बुधे लग्नदशमगते भौमे चौर्यस्य मुख्यकाल: स्यात।।

**अध्याय: २४** – अथ चतुर्विंशत्यध्याय आधाने स्त्रीणां रजोदर्शनकाल: कदा भवति तद्विषय उक्तम्। रव्यादिवासरेषु तथाश्विन्यादिनक्षत्रक्रमेण प्रथमरजोदर्शनत: सर्ववनितानां शुभाशुभफलं कथितम्। तत्राशुभयोगेष्वनिष्टफलं प्राप्तं भवति। आधानलग्ने, लग्नादिभावेषु संस्थितग्रहाणां योगेन कन्या, पुत्रो वा भवति।

**अध्याय: २५** – अथ पञ्चविंशत्यध्याये पुंसवनसीमन्तोनयनसंस्कारे कथितं यद् गर्भे तृतीयमासे पुंसवनं तथा च पुंसवनं पश्चात् गर्भे चतुर्थे, षष्ठे, अष्टमे वा मासे स्त्रीणां सीमन्तोनयनसंस्कारं कुर्यात्। लग्ने बली चन्द्रमा शुभग्रहाणां दृष्टो युतो वा तथा चान्ये ग्रहा: बलिनस्तदा सन्तानो बहुगुणयुतो भवति। गर्भतुष्ट्यर्थे विध्यनुसारेण विष्णो: पूजां कारयेत्।

**अध्याय: २६** – अथ षडविंशत्यध्याये जातकर्मनामकर्मनामके शिशोर्यस्मिन् समये जन्म भवति, तस्मिन् समय एवं मुहूर्ते जातकर्म तथा च सूतके विनिर्गते तस्मिन् दिने शिशोर्नामकरणसंस्कारं कुर्यात्।

**अध्याय: २७** – अथ सप्तविंशत्यध्याय अन्नप्राशननामके बालकानां युग्मेषु मासेषु च षष्ठमासे संवत्सरे वा तथा च कन्यकानां अयुग्ममासेषु नवान्नप्राशनं कल्याणप्रदं कथितम्। तत्र शुभमुहूर्ते शुभफलं प्राप्नोति।

**अध्याय: २८** –अष्टाविंशत्यध्याये, तृतीये, पञ्चमेऽब्दे वा स्वकुलाचारतो हितं स्वगृह्योक्तविधानेन यत्नेन शिशूनां चौलकर्म कारयेत्। चौलेनैवायुषो वृद्धिश्चौलेनैवायुष क्षयो भवति। अतो बुद्धिमान् प्रयत्नेन शुभमुहूर्ते चौलकर्म कारयेत्।

**अध्यायः २९** -एकोनत्रिंशत्यध्याय उपनयनविषय उक्तम् – श्रुतिस्मृतीनामुत्तमस्थानं द्विजः। तथा च द्विजस्योत्तमत्वं व्रतबन्धः स्यात्। व्रतबन्धलग्नशुद्धत्वेन द्विज उत्तमः स्यात्। अथ तस्माद् द्विजानां तदवाप्तिकारणं तल्लग्नशुद्धिः शास्त्रानुसारेणोपनयनाध्याये कथिता। विप्रादिवर्णानुसारेण मौञ्जीबन्धनं कदा शस्यते इत्युक्त्वा, उपनयनकाले ग्रहाणां बलाबलं, शुभतिथि–वार–नक्षत्रादियोगानां विषये विस्तृतरूपेण वर्णितम्।

**अध्यायः ३०** – अथ त्रिंशत्याध्याये, समावर्तनाध्याये उपनयनपश्चात अधीत्यवेदांश्च तदर्थशास्त्राप्यभ्यस्य स्वगुरोरनुज्ञां लब्ध्वा गोदानतः पश्चात पाणिपीडनात्प्राक् (विवाहपूर्वे) समावर्तनसंस्कारं कुर्यात्।

**अध्यायः ३१** -एकत्रिंशत्यध्याये, विवाहप्रश्नविषये कथितं यत् – शुभे दिने ताम्बूलपुष्पाक्षतपूर्णपाणिः कर्ता च गत्वा दैवज्ञं प्रणिपत्य तस्मै वरकन्ययोश्च विवाहविषये पृच्छेत्। तत्प्रश्नलग्नस्थित्यधारेण दैवज्ञो विवाहपरत्वे शुभाशुभफलं कथयेत्।

**अध्यायः ३२** – अथ द्वात्रिंशदध्याये, विवाहनामक उक्तम् – कश्चिद् गृहाश्रमसमो न परोऽस्ति धर्मः, सोऽपि सुगुणवृत्तयुताङ्गनासु स्थितः। अतो लग्नवशतो गुणवृत्तिलब्धिस्तासां तथाविधसुलग्नमतस्तद्विवाहाध्याये कथितम्। स्वजन्मवर्षाद् युग्मेषु वर्षेषु कन्यकानां विवाहस्तथा विषमवर्षेषु नराणां विवाहः शुभदः स्यात्। विपर्यये दुःखप्रदः स्यात्। विवाहे शुभदिनतिथिमासचन्द्रबलमुक्त्वा पञ्चशलाकाचक्रविषये कथितम्। आत्माभ्युदयाभिलाषी मनुजः स्वजन्ममासे, जन्मनक्षत्रे, तिथिक्षये, वैनाशिकादिद्वयनक्षत्रेषु विवाहं वर्जयेत्। तथा च ज्येष्ठकन्यकाया ज्येष्ठपुत्रस्य वा ज्येष्ठमासे विवाहं वर्जयेत्। विवाहो वरकन्ययो राशिनक्षत्रयोरैक्ये मृत्युप्रदः स्यात्। सर्वग्रासग्रहणे सप्तरात्रं, खण्डग्रासे तदर्धं तथा चाद्भुत उत्पाते सप्तरात्रपर्यन्तं विवाहादिकार्याणि वर्जयेत्। इत्युक्त्वा

वैवाहिकस्यैकविंशतिमहादोषाणां विवरणं ब्रह्मणा स्वसंहितायामुक्तं तदनुसारेण प्रतिपादितं यथा–

उत्पातभोल्कामहदाख्यदोषाः सर्वेषु देशेषु सदा विवर्ज्याः।

एकोत्तराविंशतिरत्रदोषाः स्वसंहितायां च पितामहेन।।२४।।

अध्याये पितामहसिद्धान्ता विस्तृतरूपेण वर्णिताः सन्ति। यथा विवाहलग्ने वारदोषाः, अष्टमलग्नराशिदोषाः, लग्नशुद्धिरादिकं विस्तृतरूपेण वर्णितम्। ब्राह्म–दैव–प्राजापत्य–आर्ष–गान्धर्व–आसुर–राक्षस–पैशाचादि–अष्टौ प्रकारका विवाहाः कथिताः।

विवाहमेलापके वर्णदिन–गण–महेन्द्र–स्त्रीदीर्घ–योनि–राशि–राश्यधिप–वश्य–नाडी–वेध–भूत–लिङ्ग–विजाति–गोत्र–पक्षी–आय–योगिनी–सुधांशयुजो–एतेषामष्टादशकूटानां विचारः कथितः। वसिष्ठसंहिताया वैशिष्ट्यमिदम्। तत्र वरकन्ययोर्जन्मनक्षत्रयोरष्टादशकूटे महत्त्वं प्रस्थापितम्। यथा नक्षत्राधारेण वेधकूट–गण्डभूत–लिङ्ग–जातिकूट–गोत्रकूट–पक्षिकूट–आयकूटादिनिर्णयाधारेण वरकन्ययोर्विवाहनिर्णयं कारयेत्। तत्र मध्यंदिनगते भानावभिजितन्नामा दिनस्याष्टमो मुहूर्तः सर्वदोषान् नाशयति, यथा रविरन्धकारं नाशयति। तथा सूर्यात् सप्तमं गोधूलिसंज्ञकलग्नं सर्वदोषहरं यद्वद्गङ्गाजलं निखिलपापान् नाशयति। एतत्प्रकारेण विवाहेऽभिजित्संज्ञकमुहूर्तस्यैवं गोधूलिलग्नयोर्महत्त्वं प्रस्थापितम्।

**अध्यायः ३३**–त्रयस्त्रिंशदध्याये राजाभिषेकनामक आधानलग्नेश–राशीश–दशाधिनाथ–बलिनि, सूर्यचन्द्रभौमगुरुशुक्राणां ग्रहैः, उत्पातादिदोषविवर्जितकालेषु नृपाणां राजाभिषेक इष्ट इति कथितम्। अनन्तरं राजाभिषेकलग्ने ग्रहाणां स्थित्यनुसारेण नृपस्य शुभाशुभफलं कथितम्। यथा यस्य नृपस्याभिषेके गुरुर्लग्ने, त्रिकोणे वा संस्थितः, षष्ठे कुजस्तथा दशमे शुक्रः संस्थितः, तदा स नृपो विक्रमराजलक्ष्म्या मोदत इति नवमश्लोक उक्तम्। विधिवदायुधानि पट्टं च विप्रान्गन्धादिनार्चयेत्, देवान्पितॄनर्चयेत, आशिषोवाचनं कृत्वा शुभलग्ने शुभान्विते

वेदमन्त्रैर्घोषैर्भद्रासनयुक्तस्य नृपस्य राजाभिषेकं कारयेत्। सत्कीर्तिमाप्नुयात्, नियमेन सर्वप्रयत्नेन राज्यं धर्मेण पालयेत् ।

**अध्यायः ३४** – अथ चतुस्त्रिंशदध्याये, अश्वारिष्टशान्तिनामके कथितं यत् – यस्य नृपस्य समीपेऽश्वाः सन्ति, स विजयी, एवं श्रीमान् स्यात्। तस्मादश्वाभिरक्षणं कार्यम्। विधिवत्पूजनेनाश्वशान्तिकर्म कुर्यात्, नृप ऐश्वर्यमेवं वीरलक्ष्मीं लभेत्।

**अध्यायः ३५** – अथ पञ्चचत्रिंशदध्याये, गजारिष्टशान्त्याख्ये कथितं यत् – यस्य नृपस्य समीपेऽधिकगजाः सन्ति, तदधीनाखिला धरा स्यात्। तस्माद् गजाः पोषणीयाः सर्वदा। यदा यदा गजानां व्याधयो जायन्ये, तदा पूजाहोमजपादिभिः शान्तिं प्रकुर्यात्। दोषशान्त्यर्थे पञ्चदुर्गां, रुद्रं, पुरुषसूक्तं, पञ्चब्रह्मादिभिर्मन्त्रैर्गजशालासु मार्जयेत्। पूजनविधिर्विस्तारपूर्वकं कथितः। विप्रान् दक्षिणां समर्पयेत्, विधिवत्पूजनेन यो नृपः सम्यग्गजशान्तिं कुरुते, स गजवृद्धिं, सर्वान्कामानवाप्नोति।

**अध्यायः ३६** – अथ षट्त्रिंशदध्याये ग्रहणशान्तिः कथिता। यस्य जन्मनक्षत्रे सूर्यचन्द्रयोर्ग्रहणं भवेत्, तस्य व्याधिभयं, धनक्षय इति फलं भवति। अतस्तस्य दोषापनुत्तये द्रव्यमन्त्रविधानेन शान्तिकर्मकरणीयम्।

**अध्यायः३७** –सप्तत्रिंशदध्याये यात्राविषये कथितम्। परविषयविजयार्थं,समरेषु गन्तु र्वा समस्तपृथिव्यां परयात्रा, सामान्ययात्रा–एवं द्विविधा यात्रा कथिता। तत्र कथिततिथिवारनक्षत्रयोगेषु सामान्या यात्राभीष्टफलदा स्यात्। तथा च कथितयोगलग्नराजयोगेषु समराह्वया यात्रा शुभदा स्यात्। निखिलगुणयुतस्य राज्ञो यात्राया विधानं कथितम्। जातकमवलोक्य फलसिद्धिस्त्वन्यथा मृषा भवति। यात्राप्रयाणे शुभाशुभशकुनं दृष्टव्यं यात्राविचारश्च कर्तव्यः।

**अध्यायः ३८** –अष्टत्रिंशदध्याये गृहप्रवेशो वर्णितः। भूतबलिपूजनं च कृत्वा नव्यगृह उत्तरायणस्थिते सूर्ये, गुरुशुक्रयोर्बले, शुक्लपक्षे, शुभवासरे, कालशुद्धिं दृष्ट्वा गृहप्रवेशः शुभदः स्यात्। यद् गृहं वास्तुबलिपूजारहितं कपाटहीनं छन्नगृहं विरूपं स्यात्, तद् गृहे सर्वापदो विशेयुः। नव्यगृहे प्रथमप्रवेशोऽपूर्वसंज्ञः, यात्रावसाने सुपूर्वसंज्ञप्रवेशस्तथा च जलाग्निभयादिजातगृहे पुनः निर्मिते, अनन्तरं गृहप्रवेशो द्वन्द्वसंज्ञकः। एते त्रिविधाः प्रवेशाः प्रदिष्टाः। सूर्यादिवारपरत्वेन गृहप्रवेशे तथा च मासपरत्वेन गृहप्रवेशे विविधानि फलानि लभ्यन्ते। यथा माघमासोऽर्थलाभप्रदः फाल्गुनमासः पुत्रार्थलाभप्रदः। तथैव तिथिनक्षत्रयोर्योगेनापि विविधाफलानि सन्ति। गृहप्रवेशकालिकलग्नादिभावेषु संस्थिताः सूर्यादिग्रहा जातकानां शुभाशुभफलं प्रददति।

**अध्यायः ३९** – अथ एकोनचत्वारिंशदध्याये, वास्तुगृहग्रामपुरादीनां निर्माणे ब्रह्मणोक्तं वास्तुज्ञानं सूक्ष्मतोऽधुना कथितम् । सर्वप्रथमं भूपरीक्षां कृत्वा शल्यज्ञानपरीक्षणेन शुभाशुभभूमिज्ञानमावश्यकम्। तदनन्तरं सूत्रमानेन दिक्साधनं कृत्वा, पूर्वादिचतुर्दिक्ष्वष्टौ प्रकारेण द्वारस्थापने फलविषये कथितम्। यथा पूर्वदिशायां दुःखशोकौ, धनप्राप्तिर्नृपपूजा, महद्धनम्, स्त्रीजन्मपुत्रहानिः–एतानि फलानि प्राप्यन्ते। एवमन्यदिक्षु ज्ञेयम्। गृहनिर्माण एकाशीतिवास्तुपदमण्डले मध्ये ९ पदसंख्या ब्रह्मस्थानं कथ्यते। गृहनिर्माणे वास्तुमर्मस्थान–सन्धिस्थानोपरि कुड्यपादादिकं न कारयेत्। गृहनिर्माणे मासपरत्वे तथा च ग्रहनक्षत्राणां स्थित्यधारेण गृहस्वामिनस्तदेव फलं भवति। गृहपिण्डे धन–ऋण–आय–नक्षत्र–नवांश–वारादि–आनयनज्ञानमावश्यकम्। यथा विवाहे वरकन्ययो राशिकूटादिकमावश्यकं तथैव गृहनिर्माणे गृह–गृहस्वामिनो राशिकूटादिविचारः कर्तव्यः। तस्माद्वैनाशिकनक्षत्राणि सदा वर्जयेत्। एकशालायां षोडशगृहाणि, द्विशाल–त्रिशालवास्तुलक्षणानि फलं च विस्तारपूर्वकं वर्णितं, यत् तस्य वैशिष्ट्यम्। कस्मिन्नाये कं गृहं शुभदमिति विचारस्तथा च गृहसमन्ताद्

वृक्षारोपणफलादिकमपि विस्तारपूर्वकं वर्णितम्। एतत्प्रकारेणानेकविषयाणां समावेशः। अन्ते २२२ श्लोके वास्तुपूजनस्य महत्त्वं कथितम्।

यथा वास्तुपूजामकृत्वा यः प्रविशेन्नवमन्दिरे।
रोगान्नानाविधान्क्लेशानश्नुते सर्वसंकटान्।।२२२।।

**अध्यायः ४०**-चत्वारिंशदध्याये, सुरप्रतिष्ठानामके शिवविष्णू तथान्यदेवतानां प्रतिष्ठा उत्तरायणे, गुरुशुक्रयोर्दृश्यमाने कारयेत्। तत्र कार्त्तिकादिमासेषु, तिथिवारनक्षत्रपरत्वने प्रतिष्ठालग्ने तथा च पञ्चाङ्गशुद्धिविचारेण कर्तव्यम्।

**अध्यायः ४१**-एकचत्वारिंशदध्याये गुणनिरूपणनामके कथितं यत् –काल एवेश्वरः साक्षादीश्वरः काल एव सः । एवमाद्यैर्गुणैर्दोषैर्नित्यं कालः समन्वितः। तस्मात्कालगुणा दोषा अस्मिन्नध्याये कथिताः। नन्दादितिथयः कथिताः। वारनक्षत्रयोर्योगेन विविधाः शुभयोगा जायन्ते। यथा नन्दातिथि(१,६,११)दिने यदि पूर्वाषाढा–ज्येष्ठा–कृत्तिका–आर्द्रा–श्रवण–उत्तराफाल्गुनी–उत्तराषाढा–उत्तराभाद्रपदा वा नक्षत्रं शुभवारेण समन्वितं, तदा यो योगः स सर्वकार्येषु शुभप्रदः स्यात्। उक्तं च –

नन्दास्वम्बुपवित्राग्निरौद्रविष्णूत्तरात्रयम्।
वारयोगा भवन्त्येते सर्वकार्ये शुभप्रदाः।।६।।

तद्वल्लग्नादिभावेषु स्थिताः सूर्यादिग्रहाः कथितस्थानेषु स्थिता विविधान् शुभयोगान् जनयन्ति। तैस्तदेव फलमाप्नोति। उक्तं यथा –

लाभस्थितो यदा सूर्यश्चन्द्रो वाप्येक एव सः।
गुणसागरयोगोऽयं यदा भवति चेद्बली।।४१।।

**अध्यायः ४२** – अथ द्विचत्वारिंशदध्याये, दोषनिरूपणविषये पितामहानुसारेण गुणापवादः पृथक् पृथक् कथितः। वारतिथिनक्षत्रसंयोगेन विविधा योगा जायन्ते।

तस्मादशुभयोगाः शुभकार्येषु सर्वदा वर्जयेत्। उक्तं यथा –

सिंहे सिंहांशके जीवे कलिङ्गे गौडगुर्ज्जरे।
कालमृत्युरयं योगो दम्पत्योर्निधनप्रदः।।२७।।

यदि गुरु; सिंहराशौ, सिंहनवांशके स्थितस्तदा कलिङ्गगौडगुर्जरदेशे कालमृत्युनाम्ना योगः ख्यातः। स दम्पत्योर्निधनप्रदः स्यात्। अनन्तरं मूलाश्लेषागण्डादिदोषाः फलसहितं कथिताः। तत्र गण्डदोषशान्तिविधिः सविशदं व्याख्याता।

**अध्यायः ४३** – अथ त्रयश्चत्वारिंशदध्याये दैवज्ञानां हितार्थाय गुणदोषापवादविषयः कथितः। अधर्मेण जितो धर्मस्तथा पापचयेन पुण्यः। यद्वत्कलियुगे स्यात् , तद्वद् दोषेण गुणसञ्चयो हन्यते। विविधशुभयोगा अशुभयोगान् हन्ति यथा — श्रेष्ठयोगो महाबलवन्तं मृत्युयोगं हन्ति यथा सर्पस्तु मूषकम्। शुभयोगो महाबलवान् पापयोगं निहन्ति यथातिगर्वितशार्दूलः कृष्णमृगं हन्ति। वर्धमानयोगः पङ्गुयोगं निहन्ति यथा सुगुणसम्पन्नमन्नम्। एकार्गलाह्वययोग इन्द्रदण्डं महायोगं हन्ति यथा सन्निपातज्वरः पूर्णगर्भं हन्ति। प्रतिसूर्यनामायोगो लग्नलग्नांशसम्भूतं शुभग्रहजं शुभग्रहं निहन्ति यथा कुठारो विटपम्। एवंप्रकारेण विविधयोगविषये कथितम्। अतो गुणाश्च दोषाश्च गुणापवादान्दोषापावादांश्च सम्यग् विचिन्त्य मङ्गलकार्येषु गुणाधिकमल्पदोषं कालं दैवज्ञः कथयेत्।

**अध्यायः ४४** – अथ चतुःचत्वारिंशदध्याये वस्त्रपरिधानविषये नवाम्बरधृतिर्मनुजानां सन्मानायतनं, सत्कीर्तिसौभाग्यदं, शत्रूणां दमनकरं, सुहृत्प्रियकारी, सद्भाषणदं, कान्तिदं, विद्यानां तिलकं, सभायां जयदं, त्रैलोक्यवश्यकारी स्यात्। अतस्तस्मादश्विन्यादिनक्षत्रेषु, रव्यादिसप्तवारेषु नववस्त्रधारणफलमध्याये कथितम्।

**अध्यायः ४५** – अथ पञ्चचत्वारिंशदध्याये, उत्पातविषयः कथितः। प्रकृतेरन्यत्वं, मनुजाः पापकर्मरताः स्युः। अधर्मेणासत्येन नास्तिक्यादतिलोभतो

नृणामनाचारेण नित्यमुपद्रवाः प्रजायन्ते। भौमदिव्यान्तरिक्षाः-एते घोररूपिणस्त्रयः प्रकाराका उत्पाता स्युः। तस्मादुपद्रववशाद् भौमोत्पाताः स्वल्पफलदाः शान्त्या शमं यान्ति। अन्तरिक्षा उत्पाता मध्यमफलदा मार्दवं यान्ति। किन्तु दिव्या उत्पाता वर्षार्धात्तदर्धतः सम्पूर्णफलदा होमान्नगोभूमिदानैस्तत्कोटिहोमतो भगवतो रुद्रस्यानेकविधपूजनेन, गोदोहात्तत्पुरःसरमलङ्कृते क्षितितले यावत्क्षीरप्लवो भवेत्, एवं कुर्यात्, शमं यान्ति। नृपः पुरे, जनपदे, कोशे, वाहनेषु, पुरोहिते, स्त्रीपुत्रात्मनि –एतैरष्टभिर्दैवोत्पातेन पीडितो भवति। अतस्तस्मात् शान्तिकर्म कारयेत्। अथाध्याये विधिपुरःसरं विस्तारेण, सविशदं शान्तिकर्म कथितम्। अनन्तरं पूर्वाष्वष्टदिशासु शिथिली जायते, तस्या फलानि च कथितानि। एवंप्रकारेण विधिपूर्वकं मन्त्रजपहोमादिभिः शान्तिकर्म कुर्यात्, ब्राह्मणाय कुम्भं वस्त्रं सदक्षिणं दत्त्वा पश्चाद् ब्राह्मणान्भोजयेत्। तस्मात् समस्तदोषात्प्रमुच्यते।

**अध्यायः ४६** - अथ षट्चत्वारिंशदध्याये, रोगोत्पत्तिशान्तिविषयः कथितः- मनुजो रोगेन पीडितो भवति। अतो रोगशान्त्यर्थे रोगार्तानां शरीरिणां बलिपूजाङ्गजपहोमैश्च ब्राह्मणभोजनै रोगशान्तिः कर्तव्या। यस्मिन् नक्षत्रे नृणां रोगः संजायते, तन्नक्षत्रस्वामिनः पूजनं सन्तुष्ट्यर्थे कर्तव्यम्।तन्नक्षत्रस्वामिनः प्रतिमा सुवर्णेन प्रमाणेन तदर्धेन वा वित्तानुसारेण निर्मितव्या। तदनन्तरं यथाविधि ताम् – " रोगादस्माच्च मां रक्ष तव वश्याश्च धिष्ण्यपाः" इति भक्तिपूर्वकं प्रार्थयेत्। वस्त्रसहितां प्रतिमां दद्यात्। आचार्याय कुटुम्बिने भक्तिपूर्वकं दक्षिणां दद्यात्। पश्चाद् ब्राह्मणान् भोजयेत्। तिथिदिननक्षत्रयोः पूजनेन सर्वान्कामान्वाप्नोति रोगी रोगात्प्रमुच्यते। अथाध्याये अश्विन्यादिनक्षत्रोत्पन्नरोगव्याधीनां मन्त्रैर्दानेन पूजनं कृत्वा रोगी रोगात्प्रमुच्यत इति विस्तारपूर्वकं विवेचितम्। यथा-अश्विन्यादिनक्षत्रोत्थितरोगो नवरात्रेण मुच्यते। देवस्य त्वेति मन्त्रेण गायत्री कश्यपोऽश्विनौ श्वेतवर्णौ, अमृतेन परिपूर्णं पद्मकलशं धारयेत्। चन्दनोत्पलपुष्पाज्यगुग्गुलुगुडप्रियौ, क्षीरलड्डूकभोक्तारौ, समिधः क्षीरवृक्षजा

गुडोदनबलिं दीपैः सहितं दद्यात्। एवंप्रकारेण तिथिवारपरत्वे रोगोत्पन्नविषये कथितम्। आधाननक्षत्रे, निधननक्षत्रे, प्रत्यरितारायां, जन्मनक्षत्रे तथा विपत्तिताराजनितनक्षत्रेषु व्याधिः क्लेशाय मरणाय च भवति।